Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ श्री रुद्रम् नमकम् ॥

## ॐ नमः शिवाय

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ श्री रुद्रम् नमकम् ॥

ॐ नमो भगवते रुद्राय॥
नमस्ते रुद्रमन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥
या ते इषुः शिवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो रुद्रमृडय॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥
शिवेन वचसा त्वा गिरिशच्छा वदामसि।
यथा नः सर्वमिज्जगत् अयक्ष्मं सुमना असत्॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वान्जम्भयन्सर्वाश्च यातुधान्यः॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः।
ये चेमा रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥

अवतत्य धनुस्त्वगंसहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवां उत।
अनेशन्नस्येषव आभुरस्य निषंगथिः॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तया अस्मान्विश्वतस्त्वमयक्ष्मया परिब्भुज॥

# ॥ श्री रुद्रम् नमकम् ॥

नमस्ते अस्त्वायुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः।
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः॥

नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमः।
नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमः॥
नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः।

नमो भवस्य हेत्यै जगतां पतये नमः॥
नमो रुद्रायाततायिने क्षेत्राणां पतये नमः।
नमः सूतायाहन्त्याय वनानां पतये नमः॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमः।
नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमः॥
नमो भुवन्तये वारिवस्कृताय औषधीनां पतये नमः।

नमो उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः॥
नमः कृत्स्नवीताय धावते सत्त्वनां पतये नमः।
नमः सहमानाय निव्याधिनेऽव्याधिनीनां पतये नमः॥

॥ समापन ॥
ॐ नमो भगवते रुद्राय।
ॐ शान्तिः शान्तिः शान्तिः॥